CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ

वाचं धेनुमुपासीत

नेपालस्य

[इतिहासप्रधानं विविधविषयविभूषितं मासिकं पत्रम्]



संस्कृत-सन्देशः

काष्ठमण्डपः [काठमाडौं=मरुसत्तल]

प्रथमे चत्र १.— गोरक्षनाथमन्दिरम् —षष्ठोऽङ्कः ६.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सम्पादकौ—

योगी नरहरिनाथः पं० बुद्धिसागरपराजुली च

मूल्यम् ४।, ४) षाण्मासिकम् २।५०, २॥) मासिकम् ।५०

वि. संवत् २०१० आश्विनशुक्लैकादश्याम्

शकसं. १८७५ ने. सं. १०७

लेखसूची

काष्ठमण्डपः	१
श्री ५ पृथ्वीनारायणजन्मकुण्डली	२
पशुपतिपुराणम्	३
सौवर्णलेखः	४
जयरत्नाकरः समीक्षा	५
कृत्यचिन्तामणिः	६
कृत्यतत्त्वार्णवः	७
कृत्यरत्नावली	८
ऋद्धिलक्ष्मीशिलालेखः	९
कीलेश्वरताम्रलेखः	१०
भुवनलक्ष्मीसुवर्णलेखः	११
मानदेवजयस्तम्भलेखः	१२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ

काष्ठमण्डपः

[कलाक्षरैः]

इदं नेपालराजधान्यां काष्ठमण्डपाख्यं नाम अस्ति ॥ नेपालराज्ये मरुस्थलमिति विख्यातं विशालं मांसु अस्यातं प्राचीनं सर्वतो मोक्षदायकत्वात् बालवृद्धाल काष्ठमयत्वात् काष्ठमण्डपं कथ्यते ॥ इदं मण्डपं [मरु हिटि] हनुमद्ध्वजप्रासादस्य मुखे वर्तते ॥ अतएव आर्यावर्तस्था जलप्रपाली मण्डपप्रारा [मरु हिटि] कथ्यते ॥ अतएव नानाभ्यो पुराजाभ्यो समा आगतप्रतोली, [मरु ठोल] भण्यते ॥ अतएव तत्र काष्ठमण्डपस्थानं कथ्यते ॥ एतस्मादेव कारणान्नेपाले मल्लकुलजाते शिलाभिलेखेषु ताम्रलिपिषु बालपत्रेषु चान्येषु च कालमत्रेषु शासनेषु संकल्पा कथ्यमुल्लिख्यते स्म ॥ तथाहि——

ॐ अद्य ब्रह्मणो द्वितीयपरार्धे श्वेतवाराहकल्पे वैवस्वतमन्वन्तरेऽष्टाविंशतितमे कलियुगस्य प्रथमपादे जम्बूद्वीपे भरतखण्डे भारतवर्षे हिमवद्दक्षिणपार्श्वे नेपालमण्डले श्रीपशुपतिसन्निधाने वासुकिक्षेत्रे वाग्मत्याः पश्चिमकूले श्री ६ विष्णुमत्याः पूर्वकूले श्रीमाङ्गलपत्तने आर्यावर्तदेशे श्रीलक्ष्मीकान्तिपुरमहानगरे काष्ठमण्डपस्थाने वर्तमाने पुण्यपुरे ॥ अस्मिन्समये

Page blur.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कृष्णपक्षे अमावास्यायान्तिथौ विशाखानक्षत्रे सौभाग्ययोगे यथाकरणमुहूर्ते बुधवासरे तुलाराशिगते सवितरि तुलाराशिगते चन्द्रमसि तस्मिन् श्रीसूर्यग्रासे महापर्वणि ॥ श्रीमत्पशुपतिचरणकमलधूलिधूसरितशिरोरुहश्रीमन्मानेश्वरीष्टदेवतावरलब्धप्रसाददेदीप्यमानमानोन्नतश्रीरघुवंशावतारविकुलतिलकहनुमद्ध्वजनेपालेश्वरमहाराजाधिराजराजराजेन्द्रसकलराजचक्राधीश्वरश्रीश्रीजयभूपालेन्द्रमल्लदेवस्य ॥इत्यादि॥

एवं प्रकारेण काष्ठमण्डपमशोकमण्डपं सुवर्णप्रणालीति त्रिधा भिन्नमापप्राक् पुरमिदं प्रधानव्यपदेशेन समस्तं काष्ठमण्डपाभिधानमभूत्। स्थितिराजरत्नमल्लादिकालेऽपि ६६९ वर्षपूर्वं राजधानी काष्ठमण्डपाभिधानासीत्। काष्ठमण्डपस्य निर्माणकालो निश्चयेन न ज्ञायते। यद्यपि नेपालवंशावलीषु विविधासु विविधाः सन्ति कथा विसंवादिन्यः। नाधुनानुसन्धानमशेषतोऽस्माभिरन्यैरथवाऽकारि, येनेदमित्थमिति भणितुं शक्येत। ऐतिहासिकैरनुसन्धीयतेऽनवरतमभितः कालमानं कलाकौशलं कर्ता कारयिता कारणञ्च प्रकारश्च। बहुभिः पुरातत्त्वपरिशीलनपरैः स्वदेशीयैः परदेशीयैश्चानुमितमनेकधा नाशेषतोषाय पुरावृत्तविदुषाम्। आशास्महे साधधानतया परिशोध्यमाने नेपालमण्डले कालादिकमस्यान्येषामेतादृशामुपलभ्येतोदारचेतसा सकलेषु प्रयत्नशीलेषु। राजस्थानयोधपुराधिराजमानसिंहदेवसङ्गृहीतश्रीनाथतीर्थावल्यामित्थं कथितमुत्तराशातीर्थानुक्रमे———

[६०-६१ पृष्ठयोः]

तत्र कान्तिपुरे सिद्धो लोपी [थी] पादो [धो]ऽभवत्पुरा।
स्थित्वा तडागोपरि स रचयामास मन्दिरम् ॥ ३४५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कैलासतः समानीय स्तम्भमेकं महाद्भुतम् ।
चकार चतुरः स्तम्भान् भिद्यमानेन तेन हि । ३४६ ॥
आरोप्य तेषां शिरसि त्रिखण्डं भवनं व्यधात् ।
तस्याधिरोहिणी दिव्या मापपादसमाश्रिता । ३४७ ॥

मापपादोऽपि दैर्ध्येण त्रिशद्धस्तसमुच्छ्रितः ।
तथा हस्तद्वयमितरज्जुवेष्टनविस्तृतः ॥ ३४८ ॥

निष्पाद्य भवनं पश्चाच्चिकीर्षुर्यज्ञमुत्तमम् ।
त्रयस्त्रिंशत्कोटिमितान् देवीदेवान् शिवादितः ॥३४९॥
समाजुहाव नाथोऽसौ तेष्वायातेषु सर्वशः ।
स्वयमन्तर्दधे नाथः प्रावात्सुस्तत्र देवताः ॥३५०॥
यज्ञापेक्षा हि ते देवास्तस्थुस्तत्र निमन्त्रिताः ।
न शक्नुवन्ति ते यातुं यज्ञसम्पादनं विना ॥३५१॥
प्रत्यब्दं श्रावणे मासि दैवी वाणी भवेदिति ।
'प्रस्तुता यज्ञरचना ?' पुनः शब्दो भवेदिति ॥ ३५२ ॥
'यज्ञद्रव्याण्याहृतानि प्रायः किञ्चिदपेक्षते' ।
तत्रैवं वर्तते वृत्तं यज्ञवार्ताऽतिदूरतः ॥ ३५३ ॥
अद्यापि देवतास्तत्र वर्तन्ते यज्ञहेतवे ।
अमुष्मै तीर्थराजाय नमस्कारा भवन्तु मे । ३५४॥इति॥

नातो महत्तरमिह राज्ये मन्दिरान्तरमतोऽस्य नाम्ना राजधानी प्रसिद्धा । नेपालभूपालकुलालङ्कारः प्रसिद्धो राजा महेन्द्रमल्लोऽपि 'महेन्द्रमल्ली' ति स्वनाम्ना प्रसिद्धायां मुद्रायां (काष्ठमण्डपाधिपतिर्महेन्द्रमल्लः) इत्यादि समुल्लिख्य स्वं परिचाययति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

[illegible] [illegible] [illegible] [

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्व श्रीधाकतव सव सीसत सव गत नक्व (श्री) उदेशनाथ लिलो-
भतयाडाडाक तिथि थिरा धरकासाक थते जुन्दोश्रीपों(वा)चाली
जरहा न्हस श्री श्री छथद व सव सी सं सं थतच जुरउदेश च
छुति सामर सीमाके विषा के लागर छय थते च याड थिति
थिरा र धर छा साक थते कदाचित् विदव कारी याड स्वदेशी
परदेशी न लोस थिरा र पं धंस र पं यंग्व (ग्ल) द्वायं यो हत्या
ब्रह्महत्या स्त्रीहत्या थते या महापातक लाक जुरम् सिद्धिश
सिलाख जुरमालव जुरम् ब्रह्म गलहद्द शाल विष्णु बस पहु छुय
छालव जुरं थ सिलिलाय या थवया रौरव महारौरव तपन महातपन
वज्रीचि महानरक स पहुद पहुथ जुरं थते साषाया थिरा र घाया
स्वस्ती श्रीश्री लक्ष्मीनारायण महाराजस जुन्व थते तोत प्रजया
छ स लक्ष्मी वृद्धि आयुवृद्धि जनवृद्धि थ जुन्व थ थिरा र पेक
स मुखस्तु जलस्तथम् तस्तथम् ॥

(२)

१ (ॐ) स्वस्ति श्रीं गोऽस्तु लाक्व् ४५६ देवो गो(ग्व)स्तो
लोहोया उदयतिथि च दस (श्री) यंग्ल यो श्रीहरिगव जोष
सिंह मुख देश सामलेश्वर लोकोद्र देव तिथि च श्रायश्च देशी
हरगत नं सार दिन मुख थ दिन च शिव कार याड (उ) ता
श्री श्री जयस्थितिराजमल्लदेव प्रति स्वामी स आदेश (ह) स
सर्व देश यात वृत सास्व (स्व) जुरो लोप त (न) र सीलि
यार सं (सं) कोस सो जुरो कडारि उ (ड) थुदिव वम जुय
कों लो थानो पेव साग्व (ग्व) द्वाश लोत यह पद हत्या गोहत्या
बालहत्या स्त्रीहत्या थ लाक यु (ग्य) दिन ग्रहसर एवडायक

Blur page

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जु बालनाथ नेह गोबमदो जुरो ङ तोत हम ग जुरो दोष प्राप्त जुरो शुभरा यान भापो हाट (र) करमा क्षर माषा पावा मे थङ कृत रप णो गुमा हत्या घ क्षां डा माव जुरो यक दोषी दु थुते तेप (य) तप (य) ताहार ताहाया (पा) काल पो (गो) तये द्वाल सिमत / न) साछी थाङ तोयात सक्रो यो (पो) र नामतेव दारिद्र जुरो माठर थु दिन भका ये (पे) र श्रियंगदत (श्रीयंगल) घर हार य हन काश्री श्रियं श्रुन हर सा यंगलन काये थे थे सब दश नायक शतो जोक हापीय ततो जुरो यता तायो के थेङा मकार ङान योगी स गन पुज यार कुलासघ तो सच्छा जुरं श्रीदरसन जन भिक्षमदी जुरो राजदत्तक जोरो काहा गतं (जन) गयके ते नास सामर श्रीतयं घर तव तव मी सव कू (क) जुरं यतो सजो सतत क्षत्र सत्र घत यार मलोप मजु क (ह्व) तथा घर चक्ष् के पराज सामन क्षेत्र के सुसा (मा) देश जुक हम सघर तता सङ गोपति तता त्रित गीति पे (ये) ह सता (ना) यक क्षय श्रेय जोस सरतोता हताह जुया जी श्री श्री श्री दानपति तहार का साम वहात म सङाव तक्ष रात भवत शुभमस्तु ।

(४)

७ शुभ । स्वस्ति श्रीश्रीश्रीपशुपतिभट्टारकस्य पादपंकज-परागवहलकीर्तिः तस्य पादपद्मोपजीविनः रघुवंशावतारशुद्धिकार कुप्यजं राजति श्रीमतः श्रीश्रीरघुवंशतिलकायमानः समस्त-प्रक्रियाविराजमानः महामहः महाराजाधिराजः परमेश्वरपरम-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भट्टारकः श्रीश्रीश्रीजय जोतिमल्लस्य विजयराज्ये ॥ ततः श्रीमाणिगलः श्रीश्रीश्रीमणिकृष्णारचरणाम्बुजसेविनः श्रीत्रिमय महापात्रप्रमुखादिः श्रीदक्षिणविहारप्रधानमहापात्रसहित गतन सप्त(प्न)कृत्व वज्र महापात्र स शुद्धि स गश्चये नमः श्वते श्रीश्रीराजकुलश्रीमणिगलः तव तव मीखण्ड तव भीम शुद्ध हायत सात्र धन श्रीयंगलः श्रीगुरुः श्रीहम गयाव मते यकं जाव तव दोक मदेतीप हखतो ते तावत थिर याङ लोपालोपी मः यक श्व विक्षेप पत्र थिर काल लां याङा दुन्त (ध) थत चोसन भया जुरो ह (त) त पत्र केन कश्चित् लोपयित्वो महारौरव नरके प्रतिपतयेतः कदाचित् श्व भापा सुना लोप परद्रोस (ह) गोहत्या स्त्रीहत्या ब्रह्महत्या निसाख निर्मूल दंड माल्व जुरो श्री श्रेयोऽस्तु संवत् ५४३ आषाढशुक्लदशम्यायां तिथौ स्वाति-नक्षत्रे सिद्धियोगे शुक्रवासरे श्व संवत्सर वंगाया हंगा य (या) ति पाच माल मखो डा डा काले लकर्ण जुरो शुभं मङ्गलं भवतु सर्वजगतः ।

(५)

७ (ॐ) नमः श्रीगोरक्षनाथाय ॥

अनादि परमं ब्रह्म निष्कलं सचराचरं ।
ध्यायन्ते योगिनो नित्यं गोरक्षं प्रणमाम्यहं ॥

प्रासादकाष्ठमण्डपधौत(छह्म)रक्षा · · (खोतरामा) स्वर्णध्वजालंकृतं। स्थूलो(लां)शोऽ(सोऽ)यं योगीश्वराणां निवसन्ति नित्यं ॥

श्रीयक्षमल्लः प्रथुराजतेऽसौ ॥ श्रीगौडदेशागतदातृयोगी,
चैतन्यनाथो वरदानशौण्डः । नेपालदेशे क्रयितुं च क्षेत्रं,
चक्रं ददौ श्रीअवधूतकेभ्यः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Page blur

श्रीमन्नेपालवर्षे इरवह्निनवसु: कामबाणेर्धकृष्णे,
आषाढे चेन्दुदर्शे अहिपतिवरभे भौमवारे(ण)प्रमुक्तो।
योगिभ्यश्च प्रदत्ता विविधवडरसा दत्तवान् यत्प्रदानं
वर्षे वर्षे प्रदानं पुनरपि प्रददौ मासमासे (च) सुपुण्यं ॥
यावच्चन्द्रश्च सूर्यश्च यावन्मेरौ महीतले ।
तावत्कालं प्रदत्तोऽयमक्षति दातृसंलभेत् ॥

यदि लोभात् (परिलोपात्) प्रदानोऽयं यंत्रपालकमाप्नुते ॥
अत्रैवं दीयते दानमन्नदानफलं लभेत् ॥

अथ नेपालभाषा (न्यमुग) स्वभूर्ग बिय (लिपि) वु रो क्व थ्व छु (वु) या घर सानन गुठी स्यम् वशव्य जु रो जाके फँ ६० थ्व छे (के) फँ २० मादा फँ ४ चिवेकन हल (लु) (त्री) बिया लोके फँ १६ स्व (वै) दि यात ५ के (छ्व) फँ २ स्वा व्या (या) य फँ ३ कसा (हि) ९७ (उख) पी (पि) दितु मितव्यँ को श्वं शीन भाषा य छीवो न गुठी या त जुरो संवत् ९८५ आषाढ कृष्ण अमावास्या कोन्हु जुरो थ्व कुन्हु (कु) प्रतिवर्षी चक्र बिय जुरो शुभमस्तु सर्वदा।

(६)

[सुवर्णपत्रम्]

ओं (ॐ) नमः श्रीगोरक्षनाथाय ॥ स्वस्तिश्रीमन्नेपाला विजयजेश्वरश्रीश्रीजयरत्नमल्लदेवस्य विजयराज्ये श्रीकाष्ठमण्डपस्थानस्य प्रतिवर्षं जोगी चक्र दयके यातँ दान याँछ्य भाषा थोतेः श्रीत्रिपुरास्थान श्रीखण्डल देश या श्री ६ बालनाथेन स्वहस्तेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वविद्यमानेन स्ववाचा प्रतिपन्नीभूतेन सुवर्णद्वयकर्षाधिकचतुः-पलाङ्कितचूर्ण काला लूँ प्ल ४ कर्ष थोते या व्याजन वर्षप्रति आषाढ कृष्ण चतुर्दशी कोन्हु जोगी चक्र भुक्ति भोग याचकं यंने माल जुरो एतत्पुन्यानुभावेन यजमानस्य सपरिवाराणाम् आयुरारोग्यं चान्ते परमधामपदप्राप्तयेऽस्तु थोते दान लोप या काले पञ्चानन्तर्य पाप लाक जुरो श्रेयोऽस्तु संवत् ६३२ आषाढ कृष्ण चतुर्दशी पर अमावास्यायां पुनर्वसुनक्षत्रे वज्रयोगे सोमदिने शुभम्।

(७)

श्री अद्य ब्रह्मणो द्वितीयपरार्धेत्यादि वैशाखमासे शुक्लपक्षे ऽष्टम्यां तिथौ पुष्यनक्षत्रे शूलयोगे बवकरणे वारिमुहूर्ते बृहस्पति-वासरे मेषराशिगते सावितरे कर्कराशिगते चन्द्रमसि एतस्मि-न्दिने मन्दु इनाय मगल ठाल लयला गृहवास राजदेवश ठाकुरसिह नामेन मयजु विद्यमानेन दिवंगत स्वापिता जीवधन स्वमाता मैजुधनलक्ष्मी जुगल भ्रातृ मनु पितामह गरुडसिह जु स्वभार्या हाकु लक्ष्मी जु भार्या चिकि धीकेलक्ष्मी कनक भगति-लक्ष्मी ५तेषु नाम्नेन प्रपा दत्त कृत्वा क्षेत्रं संप्रदत्तम् अतः परं भाषा लुखुर्तार्थ लिड बुरो १॥ कुला थ्व बु या बल मानन भाद्र शुक्ल या पूर्णमासी कुन्हु ले चोम पिं तेमाल थ्वते पिंता न य र शेष दक्ष तिपु दु हिटि या पु सोधन यात हने माल थ्वते दृष्टसाक्षी यावच्चन्द्रार्कमेदिनी सम्वत् ९१० वैशाख शुदि ८ शुभम्——

इह सप्तैव लेखास्ताम्रसुवर्णपत्रेषु द्वारि दृष्टाः। प्रासादस्य तुङ्गतया पुराणतया धूमधूम्रतया परिणाहवत्तया च नाशेषतया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गवेषणा पारिता कर्तुम्। सम्भाव्यते सूक्ष्मतया परिशोध्यमाने मण्डपे दारुणि क्वचिदन्यदुपलभ्येत लेखजातम्। अत्र सर्वत्र पत्रेषु सप्तमं त्यक्त्वा प्राचीना नैपाली लिपिः। पुराणी नैपाली भाषा। अल्पं संस्कृतम्। नेदानीन्तना नेवारा अपीमां शुद्धतया पठितुं लिपिं बोद्धुं भाषां च प्रभवः। किमुत परेषां तत्र गतिः? अतस्तदुभयमेव सन्दिग्धमास्ते, पर्यालोचयन्तु विशेषविदः। अस्माकन्तु तत्पठने प्रतिलिपौ परिशोधने च विशेषेण सहयोगिनो बुद्धिसागरपराङ्गुली-घनश्यामप्रौढालय-रत्नवहादुरवज्राचार्य-यज्ञानन्दवज्राचार्यादयः। एतच्छासनानुसारमंशतोऽधुनापि तत्र क्रिया जायन्ते। वर्तमानस्थितिः पुनः प्रकाश्या वर्तते।

योगी नरहरिनाथः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रीः

राष्ट्रपितुः पृथ्वीनारायणसाहदेवस्य जनुःसमयः

गृहकुण्डली



भावकुण्डली



स्वस्तिश्रीगिरिराजचक्रचूडामणिनरनारायणेत्यादिविविधविरुदावलिविराजमानमानोन्नतश्रीमन्महाराजाधिराजश्रीश्रीश्रीश्रीश्रीमन्नरभूपालसाहदेवानां सदा समरविजयिनां स्वशास्त्रोक्तधर्मेण परिणीतायाः शरच्चन्द्रवदनायाः सर्वगुणालङ्कृतायाः अतिसौन्दर्यसच्छीलसत्यादिगुणसमूहविभूषितायाः नित्यप्रहसितवदनायाः स्वस्तिश्रीगिरिराजचक्रचूडामणिनरनारायणेत्यादिविविधविरुदावलिविराजमानमानोन्नतश्रीमन्महाराजाधिराज्ञीश्रीश्रीश्रीश्रीश्रीकौशल्यावतीदेवीनां सदा सौभाग्यवतीनां सुवर्णकुक्षेः प्रथमपुत्रो जातः, नक्षत्रनाम्ना विश्वदेवता, लोकप्रसिद्धनाम्ना स्वस्ति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रीगिरिराजचक्रचूडामणिनरनारायणेत्यादिविविधविरुदावलिविराजमानमानोन्नतश्रीमन्महाराजाधिराजकुमारश्रीमन्नृपश्रीश्रीश्रीश्रीश्रीपृथ्वीनारायणसाहदेवानां सदा समरविजयिनां जन्म :-

संवत् १७७९ शालिवाहनशाके १६४४ चान्द्रेण पौषमासे कृष्णपक्षे अमावास्यातिथेर्द्वयः ४ पले २ तदुपरि शुक्लपक्षे प्रतिपदि तिथौ गुरुवासरे पूर्वाषाढानक्षत्रघट्यौ २ पलानि ५८ तदुपरि उत्तराषाढानक्षत्रे। व्याघातयोगे घट्यौ २ पले २ तदुपरि हर्षणयोगे। बवकरणे॥ सौरेण पौषमासस्य गतदिनेषु २७ श्रीसूर्योदयतो गतघटीषु ३६ पलेषु १५ रात्रिगतघटीषु १० पलेषु १९ जन्म।

ग्रहाणां भोगा राश्यादयः। सूर्यस्य ८।२७।२०।५६ चन्द्रस्य ९।४।२३।४६ भौमस्य ८।२।५५।० बुधस्य ८।१५।३।२४ बृहस्पतेः ८।५ १८।२३ शुक्रस्य ९।१४।१७ ३ शनेः ८।३।३९।५० राहोः २।१।३१।२३ केतोः ८।१।३१।२३ प्रथमलग्नम् राश्यादि ४।२२।२१।२२ दशम लग्नम् १।१५।२१।१७

सूचना – श्रीमतो विद्याप्रियस्य विदुषः केशरशमशेरवर्मणो ग्रन्थागारे नेपालनृपालानां या वंशावली विद्यते तस्यां राष्ट्रपितुः पृथ्वीनारायणसाहदेवस्य जन्मपत्र्याः सारांशो ऽप्युल्लिखितो वर्तते। तत एतोद्धृत्य तस्य जननसमयजास्तिथ्यादय उल्लिख्यन्ते जातकविदां विनोदाय जनुःसमयजा ग्रहाणां राश्यादिभोगाः कुण्डलीद्वयञ्च निर्दिश्यन्ते – बाबुरामशर्मणा ऽऽबोर्यो पाभिधेन।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ

पशुपतिपुराणम्

यथा काश्यां विश्वनाथः। उज्जयिन्यां यथा महाकालः। यथा च सेतुबन्धे रामेश्वरः। तथा नेपाले पशुपतिनाथः। अवन्तीखण्डकाशीखण्डादयः स्कन्दपुराणखण्डा विश्वनाथादीतिहासाः प्रकाशिताः प्रचारिता व्यक्ताः। किन्तु हन्त! नेपालस्य धार्मिक इतिहासः स्कन्दपुराणस्य हिमवत्खण्डः प्रकाशितो नास्ति। केवलं नेपालमाहात्म्यमिति तस्यापि लघ्वीयानंशः प्रकाशमागतः। नाशेषतः।

पशुपतिपुराणस्य पूर्वखण्डं कुमारीगृहाधिवासिनोऽनङ्गनाथस्य गृहेऽस्ति। अत्र २ द्वाविंशत्यङ्गुलायतानि ७ सप्ताङ्गुलव्यायतानि २३ त्रयोविंशतिः पत्राणि। दृढं कर्गलम्। प्राचीना नेपाललिपिः। द्वौ वेधौ। आदौ— १ ॐ नमः श्रीपशुपतये॥

यस्य वक्त्राद्विनिष्क्रान्ता, वाग्मती लोकपावनी।
नमामि शिरसा देवं, शंकरं भुवनेश्वरं॥
येन धर्म्मार्थिना प्रोक्तं, पुराणममृतोपमम्।
नमामि मूर्ध्ना सर्व्वज्ञं, पुलस्त्यं मुनिसत्तमम्॥
यस्य काव्यं समालोक्य, पुराणमिदमुद्धृतम्।
नमोऽस्तु सततं तस्मै, व्यासाय च महात्मने॥
आसुरी सुप्रभा नाम, नगरी लोकविश्रुता।
यत्रान्धकोऽसुरश्रेष्ठ स्तपस्तेपे सुदुःष्करं॥ इत्यादि॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अन्ते तु— तत्रावतरणे नित्यं हनूमान् पर्व्वपर्व्वसु ।
तीर्थाभिषेचनात्तत्र कामसिद्धि(?)स गच्छति ॥ ७३३ ॥

इति पशुपतिपुराणे तीर्थामन्दपुराणे पूर्व्वार्द्ध खण्डः ॥

ॐ नमः श्रीवाग्मत्यै ॥ (वाग्वती सप्तपदी स्तोत्रम्)

या दैत्यराजपरितोषितदेवदेव-
भुक्ताट्टहासनिकरामलवारिधारा ।
हेमारविन्दरजसारुणितोर्म्ममाला
सा वाग्मती दिशतु कामफलं नराणां ॥
या कल्पिता पशुपतेः स्नपनाय नित्यं,
मन्दाररेणुकलिकामलपुण्यतोया ।
कुन्देन्दुशंखधवलामलफेनमाला,
सा वाग्मती दिशतु कामफलन्नराणां ॥

या पुष्पपत्रपतनाकुलतीररेखा
मुक्तोत्पला मरकतोत्पलतुल्यभासा ।
चक्राङ्कयुग्मकवलीकृततीररेखा,
सा वाङ्मती दिशतु कामफलन्नराणां ॥
या निम्नगा सुरसरिज्जलसन्निकाशा,
शैलाधिराजकटकोपलसंस्खलन्ती ।
सोपानपंक्तिसदृशा त्रिदशालयस्य,
सा वाङ्मती दिशतु कामफलन्नराणां ॥
या पूजिता विकसितैरपि पारिजातै-
स्तीरोपलेषु सततं सुरसुन्दरीभिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नागाङ्क(ङ्ग)नाबदनपङ्कजश(स)क्तफेना,
सा वाग्मती दिशतु कामफलं नराणां ॥

या मानिता मकरकेतुवचोभिरुच्चैः
संरक्षणापहरणादपि चन्द्रवत्यः ।
देवाङ्गनाकुचतटाहतवीचिमाला,
सा वागमती दिशतु कामफलन्नराणां ॥

या सर्व्वकामफलदा वृषसाधकस्य
क्रीडानुरागजननी नरकामिनीनां ।
संपूजिता विकसितैरपिपुष्पवृष्ट्या
सा वाग्मती दिशतु कामफलं नराणां ॥ ७५२ ॥

इति वाग्मतीप्रशंसायां पशुपतिपुराणे पुलस्त्यभाषिता वाग्मत्याः स्तुतिः समाप्ता ॥ ॥ इति वाग्मतीमहात्म्यप्रशन्सायां(?) पशुपतिपुराणं समाप्तं ॥ ॥ सम्वत ६२४ श्रावणकृष्णदशम्यां तिथौ मृगशिरनक्षत्रे सोमवासरे लिखितमिति ॥ शुभमस्तु सर्व्वदा ॥ शुभं ॥ (इति) वहिः पुस्तकपृष्ठे लिखितमित्थं देवनागर्याम् — घर का थर ॥ आति कहेसे समुझना श्री ॥ विस्वनाथ भट ब्रह्मणे सत्य गोदावरि संनिकटे इस्थितमस्तु पेतुरग्रामे ॥ आति ॥ श्रीविस्वनाथस्य ॥ श्री ॥ वागमति षंडे पुस्तकं ॥ श्रीक्रिस्नार्पनं ॥ (इति)

एवमध्यायक्रमः — इति वाग्मतीमाहात्म्यप्रशंसायान्तीर्थवर्णने प्रल्हादतपःसिद्धिर्नामः ॥ ... विभीषणास्त्रसिद्धिर्नाम ॥ अमोघशैलाभिवर्णो(?)नाम ॥ वाग्मतीप्रभववर्णनन्नाम ॥ इति तीर्थ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जात्राखण्डः समाप्तः ॥ प्रद्युम्नविजये गौरीवरदानो नाम ॥ महर्षिसन्दर्शनो नाम ॥ प्रद्युम्नविजये प्रभावतीविवाहो नाम ॥ रत्नापहारो नाम ॥ उद्योगवर्णनो नाम ॥ प्रभावतीविनोदनो नाम ॥ नारदालापो नाम ॥ विराधदर्शनो नाम ॥ महेन्द्रदमनवधो नाम ॥ प्रद्युम्नविजयखण्डः समाप्तः ॥ ५३० ॥ ततः ॥ १ ॐ नम शिवाय ॥ प्रणम्य शिरसा भक्त्या पशूनाम्पतिमव्ययं ।
पुराणं संप्रवक्ष्यामि मुनिभिः पूर्व्व वर्णितं (इत्यादि)

मध्ये च— लिच्छवीनान्नरेन्द्राणां राज्यभूमिमिमां शुभां ।
प्रजाश्चाप्याश्रयिष्यन्ति, बहिर्देशागतास्तदा ॥
पुण्यवन्तः प्रजाः सर्व्वा, धार्म्मिकाश्च नराधिपाः ।
प्रासादपङ्क्तयश्चित्रा, भवन्ति मम तेजसा ॥
अयं हि हिमवत्कुक्षौ, नेपाल इति चोच्यते ।
नदी विष्णुपदी चापि, चक्रमार्गा च निम्नगा ॥
तथा मणिवती चापि, तिस्रः पुण्याः सरिद्वराः ।
क्रमशः श्रूयतां पुत्र, पृथक्कामफलप्रदं ॥
निहते चेन्द्रदमने, तदा कमलसम्भव ।
सेतुं विदार्य कृष्णेन, वाग्मतीम्परिमोक्ष्यते ॥
वाग्मती(?) च नदीभूते, घने जाते च मण्डले ।
समुत्पत्स्यामि ब्रह्मेन्द्र, तच्छरीरा शिलातनुः ॥
बहुभिः क्षीरधाराभिः सिच्यत्समुपलक्ष(?) च ।
सन्दृश्यन्ते तदा लोकैः, खनितेन नदीतटे(?) ॥
चम्पकद्रुमच्छायाभिः, शोभितम्मम विग्रहं ।
चतुर्म्मूर्त्तिधरम्भक्त्या म्लेच्छैः सम्पूज्यते तदा ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जित्वा कैरातराजानम्बाक्येन प्रत्ययेन च ।
करिष्यति तदा राज्यं, वैशाल्याधिपतिर्बली ॥

इति पशुपतिपुराणे श्लेष्मान्तकवनावतरणो नाम ॥ इति पशुपतिपुराणे हरिणेश्वरश्रृङ्गग्रहणो नाम ॥ हरिणेश्वरवाक्यं नाम ॥ इति पशुपतिपुराणे गोकर्ण्णस्थापनो नाम ॥ इति पशुपतिपुराणे गोकर्ण्णेश्वरप्रतिष्ठापने पूर्व्वार्द्ध खण्डः ॥ दक्षिणगोकर्णप्रतिष्ठापनो नाम ॥ पशुपतिपुराणे तीर्थानन्दपुराणे पूर्व्वार्द्ध खण्डः ॥ इति ।

२२ एते द्वाविंशतिरध्यायाः सन्ति । प्रायः सहस्रं श्लोकाः सन्ति । एते पूर्व्वार्धखण्डास्त्रयस्तस्य पार्श्वे परं नोत्तरं खण्डमासादितम् । ततः सर्वे पाठकमहानुभावा परमावश्यकतामनुभवन्तः पशुपतिपुराणस्योत्तरखण्डानुसन्धाने दत्तावधाना भवन्तु भवन्तु चात्र सूचनादातारः । यदि समग्रं लभ्येत शिवरात्रिकाले प्रकाश्य प्रचाराय प्रबोधाय च यात्रिणां करसरोरुहेषु समर्प्यत ।

१ संम्वत् ७९९ चैत्र शुक्ल पञ्चमी शुक्रवार सम्पूर्ण याङा रिपिनि विद्यापीठ या कर्म्माचार्य जयसिंहः ॥ शुभं भवतु ॥

संवत् ८६९ श्रावण कृष्ण एकादश्यान्तिथौ शुक्रवासरे श्वकुन्द्व श्रीश्रीसर्व्वेस्वरभाजुस्त जयदेव जुन थ ओ पित वीरदेव स्वर्गारोहण जुयाओ श्रीश्रीश्री पशुपति प्रीतिन श्व पशुपतिपुराण विया जुलो ॥ ॥ श्रीश्रीश्री पशुपतये नमः ॥

योगी नरहरिनाथः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ

(पशुपतिनाथमन्दिरदक्षिणद्वारि सदारश्री ५ रणबहादूर-
साहप्रतीकपादपीठे)

सौवर्णलेखः

श्रीगणेशाय नमः ॥

वर्षे वह्निरसैर्गजेन्द्रधरणीसंख्यामिते माधवे,
मासे देवगुरौ षडाननतिथौ पक्षे सिते सत्वरं ।
साध्वी शंभुसरित्तटे रणबहादूरेण भर्त्रा समं,
त्यक्त्वा देहमगाद्गी(द्गि)रीशपदवीं श्रीराजराजेश्वरी ॥

सम्वत् १८६३ साल आसिन सुदि १३ रोज मा यो सालीक श्रीकपर्दार भोट्टु पांढे ले बनाई चहाया को हो ॥ शुभम् ॥

(सं. १८६३ वैशाख शुक्ल गुरुवार षष्ठी का दिन बाग्वतीका तट मा देह त्याग गरेर (सती भयेर) पतिदेव श्री ५ रणबहादूर-साह का साथ मा श्री ५ महारानी साध्वी राजराजेश्वरीदेवी शीघ्र शिवपद मा गईन्)

[काष्ठमण्डप-सेनाङ्गन-सन्निधान-सुवर्णधाराऽभिलेखः]

स्वस्ति श्रीसंवत् १८८५ साल मिति फाल्गुण वदि ७ रोज ५ का दिन श्री ५ महारानी ललित त्रिपुरसुन्दरीदेवी ले. यो धारो बनाई श्रीकृष्णार्पण गनु (नु) भयो शुभम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(अत्र पञ्च धाराः सन्ति । मध्यवर्तिन्यस्तिस्रो गङ्गायमुनास्वरस्वत्यः कथ्यन्ते लोकैः । दक्षवामयो र्न ज्ञायेते । पूर्वस्यां गणेशः । पश्चिमायां सूर्यः । उत्तरस्यां गरुडनारायणः । दक्षिणस्यां सोपानमार्गः । दक्षिणाभिमुखाया मध्यवर्तिन्या गङ्गाप्रणाल्या दक्षपक्षे काली, वामभागे भैरवः, नीचैः शंखध्मा भगीरथः, तदभिमुखौ वेणीभूतौ त्रिशीर्षौ नागौ । शीतकाले जलं कोष्णमुष्णकाले च शीतलम् । स्थाने महोपकारि च वारि ।

योगी नरहरिनाथः

जयरत्नाकरनाटकसमीक्षा

(क्रमागता)

ततो नेपथ्यमवलोक्य । भो मदनमञ्जरि नटि अद्य सकलपृथ्वीपतिमहाराजरणबहादूरशार्दूलस्य महान् समरकोलाहलः श्रूयते । तस्मात्तमेव समराडम्बरमधिकृत्य ताण्डवं कुर्म्मः । यदि नेपथ्यमवसितं ससामाजिका त्वं शीघ्रं नेपथ्यं प्रविश । उक्तं च

यत्कार्य्यं मनुजाः कृत्वा जीवन्ति शरदां शतम् ।
तदेव कार्य्यं कुर्वन्ति धीमन्तो ज्ञानचक्षुषः ॥ २ ॥

ततः प्रविशति नटी ॥ आर्यपुत्र कस्येयं सभा

सूत्रधारः । सुवर्णदुर्वर्णाकरेश्वरस्य सभा । यदि चेन्नत्यगीत-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तालल्यसमुचिततौर्यत्रिकेण भूपतिं तोषयसि प्रिये
ऽअस्माकं महोल्लाभः ।

नटी । अहो कथं त्वमप्यांवचार्य यत्र कुत्र पतिदेवतां सतीं मां नयसि ।

सूत्रधारः प्रहस्याह

किं जानन्त्यबलाः स्वकार्य्यनिरताः शृङ्गारभोगक्षमाः
किं किं सद्मनि वर्तते पुनरिमाः किं किं न वा वर्तते ।
इत्येवं परिचिन्तयन्ति सखिभिर्दीव्यन्ति जल्पन्ति वा
को दाता कृपणश्च कोऽतिधनवान् मूर्खश्च कः पण्डितः ॥३॥

हला मदनपञ्जरि त्वं लज्जां मा कृथाः । स्वजातिकर्म्मणि क्रियमाणे लज्जां नो विदधति ।

तद्यथा

किं लज्जां विबुधाः पुराणपठने कुर्वन्ति सद्भूमिपा
राज्यानामनुशासने कुलवधूः प्रक्षालने पाद्वयोः ।
भर्तुः स्वस्य वणिग्जनाः क्रयविधौ किं भिक्षवो याचने
भ्रूकुंशा गणिकाः परानुणगतास्तौर्यत्रिके मानिनि ॥४॥

अपि कुरङ्गलोचने पश्य पश्य

स्वस्तिश्रीभिजदोर्दण्डकुण्डलीकृतकठोरकोदण्डप्रचण्डश
खण्डितनिखिलभू-मण्डलपुरन्दरसुन्दराऽश्वरसपत्नभूपालमुण्ड
न्तुष्टीकृतभूतनाथस्य मुनिविबुधविद्याधरविलेशयगुह्यककिन्नरग
र्वसिद्धतुम्बुरुपक्षचारणदनुजसीमन्तिनीकमलकोमलकिंजल्क

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गसुन्दराङ्गाधिककोमलाबयवराजकन्यामनोनुरञ्जनमीनकेतनस्य सच्चूलिकाश्रयमदामोदसंसक्तमिलिन्दमाधुर्यालापमुखरीकृतगण्डोत्तुङ्गनीलाचलसद्वशदन्तावलयूथनाथविततरणपवित्रीकृतशरीरस्य नेपालनरेशपृथ्वीनारायणसूनुसिंहप्रतापात्मजश्रीमन्महाराजाधिराजपर्वतचक्रवर्तिरणबहादूरपरमभट्टारकस्य महती सभेयम् ।

नटी । सूत्रधार आः किं मामाक्षिपसि । हे जीवनाथ त्वच्चरणकमलधूलिधूसरितप्रतीकया मया श्रीमच्चन्द्रशेखरपादारविन्दमकरन्दामिलिन्दमहीपालस्वबलविक्रमोपार्जितशङ्खकुन्देन्दुधवलकीर्तिप्रकाशितानेकदिगङ्गनाकरचारुचामीकरसंवृतचलाचलचामरसंवीज्यमानाऽघनिपतीनामनेकाः सभा नेत्रातिथीकृताः ॥

सूत्रधारः । मीनचञ्चललोचने नहि तथा । देशं वर्णयति

देवालयौघैस्तरलैस्तुरङ्गैर्मातङ्गयूथैः पुरवासिभिश्च ।
युक्तः श्रिया वासवसन्निभो लोकेषु नेपाल इति प्रसिद्धः ।५।

राजानं वर्णयति ।

राजते रणबहादुरसाहः पूर्णचन्द्रसदृशो नृपराजः ।
पाकशासनसुधर्म्मसभायां शोभते खलु यथाऽत्र जयन्तः ॥६॥

राजपुत्रं वर्णयति ।

धन्योऽयं शशिनः कुले स्वपितृभिः संपादितं राऋणं
सद्द्रव्यैः समुपार्जितैर्निजभुजैः संतारितं तत्क्षणात् ।
राज्यं येन महीभुजां च सकलं ह्रासाधिराजस्य च
श्रीमद्वीरबहादुरो विजयते संहृत्य खड्गैः स्वयम् ॥७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सभां वर्णयति

सद्विद्याभिरता द्विजाः सुचतुराः सन्त्यत्र सद्भूमिपा
जल्पन्त्यस्य पुरस्सराः क्षितिपतेर्बुध्वा हृदि प्राञ्जलिम् ।
यद्गृह्णासि गृहाण देशनिधिजं तत्सत्करं भूपते
नेपालेन्द्रसभां विलोक्य सहसा कोऽन्यां सभां यास्यसि ।८।

नटी । हे प्राणनाथ त्वयैतत्स्मारितं मयापि संस्मृतम् । तं परिक्रम्य तन्मुखमवलोक्य सस्मितोवाच ॥ अहो इदमाश्चर्य्यमाश्चर्य्यमितः शतयोजनदूरे हस्तिनापुरीनाम नगरी वर्त्तते । तत्रास्त धवलप्रतापसिंहो राजा । ममावस्थानमपि तत्रैवास्ति । पुरैकस्मिन् दिने प्रदोषावसाने कृतभोजनेन जयपालेन मत्पित्रा कृतभोजनायाः कौमुदीत्याख्याताया मन्मातुरग्रे नेपालेश्वरश्रीपृथ्वीनारायणमहाराजप्रतापोतिशयवर्णनं च यदावेदितं तत् त्वया संप्रति सकलं प्रतिपादितम् । अतो धन्याहं धन्याहम् ।

सूत्रधारः । आर्य प्रणयिनि नेपालेश्वरपृथ्वीनारायणस्य यशस्त्वत्पित्रा कथं ज्ञातम् ।

नटी । हे मेधाविन् श्रूयताम् ।

योजनं पटहस्यैकं स्फुर्जथोर्दशयोजनम् ।
लोकत्रयं वदान्यस्य यशः शब्दश्च गच्छति ॥
वदान्यस्य समायाति सन्निधौ सिन्धुजा रमा ।
यशो दिगन्तरं याति द्रुतमद्भुतकर्मणः ॥ इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नेपथ्यमवलोक्याह । भो मार्दंदंङ्गिकादयः सामाजिका नेपथ्य-
मवस्थितं यदि शीघ्रं सभां विशत ।

नटीवाक्यं श्रुत्वा ते सर्वे सभां विविशुः ।

नटी । हे कुलनायक कस्य कवेर्मधुरालापनाटकेन श्रृङ्गारादिनव-
सानां मध्ये केन रसेन वा नाटयितव्यम्

सूत्रधारः । रे ऽ वले किं न जानासि । हा धिग् हा धिगिति । सन्त्यस्मिन्नेपालनगरे पण्डिता बहवस्तेषां मध्ये बृहस्पतिरिवैक एवास्ति । तस्य पद्यरचनाप्रपञ्चमधुरालापपरम्परामपास्यान्येषां पण्डितानामालापस्तु कर्णकटुरेव । तथा हि

केचित्काव्यधुरंधराश्च कतिचिद्वैद्योपसंजीविनः
केचित् कुक्कुरवृत्तयश्च गणका नैयायिकाश्चापरे
सद्वैयाकरणा वचो हि दयितेः तेषां न मे रोचते
विद्यापल्लवशक्तिवल्लभकवेर्माधुर्यमाघर्णय ॥ ९ ॥

यथा ।

मीमांसाध्ययनेन किं कठिनतः काव्येन किं ज्योतिषा
साहित्यामरकोषसाङ्ख्यपठनैर्वेदान्तशास्त्रेण किम् ।
किं वा व्याकरणेन तर्कनिगमैः किं धर्मशास्त्रेण वा
तस्याग्रे कविता नटीव रमते यस्यास्ति कृष्णाश्रयः ।१०।

काश्यामध्ययनेन किं प्रथमतः किं पुस्तकालोकनै-
स्तर्कालङ्कृतचारुशान्तिनदियाविद्यापुरीसेवनैः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

किं बाऽध्यापकदाक्षिणात्यगुरुभिर्वैदेहजाघन्दनै
स्तस्याग्रे कविता नटीव रमते यस्यास्ति कृष्णाश्रयः ॥११॥

नवरसानां मध्ये वीररसस्याऽभ्यर्हितत्वाद् वीररसं वर्णय
नटी। कोऽसौ कविर्महानुभावः

सूत्रधारः। आर्ये श्रीमदात्रेयगोत्रसमुद्भवकान्यकुब्जकुलालङ्का-
राऊर्ज्यालोपनामकगोपीनगरनिवासिसङ्गीतशास्त्रकृता-
भ्यासश्रृङ्गारादिनवरसाभिज्ञकलाकुशलदेशभाषाश्रय-
राजनीतिनिपुणराजमान्यश्रीलक्ष्मीनारायणसूनुश्रीश-
क्तिवल्लभभट्टाचार्यो जगति प्रख्यातो वरीवर्त्ति। तद्वि-
हितरणवहादूरसाहमहाराजसमरविजयजयरत्नाकर-
नामनाटकं प्रस्तारय।

इति श्रीशक्तिवल्लभभट्टाचार्यविरचिते जयरत्नाकरनाटके
प्रथमकल्लोलः।

(शेषमन्येष्वङ्केषु)

नयराजः पन्तः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ

कृत्यचिन्तामणिः

१ ॐ नम इष्टदेवतायै ॥

विश्वेषां हितहेतवे यदि(द)गिलत्तत्कालकूटं पुरा ॥
तज्ज्वालोपशमाय मूर्ध्नि निधृते गाङ्गे यिवाराम्भवे(२)।
उत्तंसेपि कृते तुषारकिरणे तप्तान्तरः पातु वः.
शर्वाणीमुखपङ्कजाधरसुधापानेन स्वस्थो हरः ॥

आसीन्मैथिलि(ल)तीरभुक्तविषये मन्त्रप्रभावावहत,–
प्रत्यर्थिक्षितिनायकान्धतमसश्चक्राह्विजानांक्रियः।
नि(नी)त्योल्लासितमण्डलः सुमनसामर्च्यश्च पद्माश्रयो,
देवादित्य इति त्रिलोकमहितो मन्त्रीन्द्रचूडामणिः ॥

स्रष्टासौ राजलक्ष्म्याः सचिवकुलगुरुश्चेतसा विश्वसाक्षी,
क्षीणानाथानुकल्यो(पा)परवशहृदयो जङ्गमः पारिजातः।
दूष्यत्सेनापतीनामपथगतिमतां बुद्धिसिन्धोरगस्थो(स्त्यो),
ह्रस्वीरध्वान्तभानुर्निखिलनिजगुणैस्तोषयामास विश्वं ॥

अस्मादभूद्वसुमतीतलकल्पवृक्षः,
प्रख्यातकीर्तिनिचयः सचिवाग्रतंसः।
वीरेश्वरो विविधदानकृतार्थितार्थि,–
सार्थः स पार्थ इव निर्जितवैरिवीरः ॥

धैर्याचार्यविचक्षणः कृतधियामाश्वासविश्रामभूः,
दुर्भूमीन्द्रभयैरिवारणविधावच्छैतदीक्षागुरुः।

Nepal Sanskrit University, Balmiki Campus

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दाता दक्षिणमानसः प्रतिदिशं विख्यातकीर्त्तिः सदा,
शत्रोरप्युपकारकः क्षितितले कारुण्यरत्नाकरः ॥

अस्मादसाधहिमरश्मिरिवोदयाद्रे,-
रम्भोजिनीपरिमृ वृ)ढादुदितादिवांशुः ।
अंशोः प्रकाश इव विश्वहितः प्रसूतः,
चण्डेश्वरो विजयते महनीयकीर्तिः ॥

अस्मिन् मन्त्रिणि मैथिलेश्वरभुजस्तम्भप्रतापानल,-
ज्वालोद्दीपनमारुते प्रतिपदं के कम्पिता न द्विषः ।
दुष्टार्णा(नां)फणिनामिवाद्यनिभृतां धीर्योदयध्वंसिनी,
दत्ता येन शिरस्थजाङ्गलिकवत्स्वाज्ञैव सिद्धौषधिः ॥

बङ्गाः सञ्जातभङ्गाः च (श्च) कितकरिघटाः कामरूपा विरूपा,
श्चीनाः कुञ्जादिलीनाः प्रमुदितविलसत्किंकिराताः किराताः ।
नेपाला भूमिपाला भुजबलदलितास्तेश्वलाटाश्च लाटाः,
कार्णाटाः केन दृष्टाः प्रसरति समरे मन्त्रिरत्नाकरस्य ॥

यस्य प्रतापानलतापिताना,मरातितन्वीस्तनपर्व्वतानां ।
भियेव भूमिर्विषयापिमुक्ता मुक्तालताभिःकरतालनेभ्यः ॥
स्रवदमृतमहाभिषेकभाजां शुभचरितैः सुमनोभिराप्तवासां ।
अयमदित पुरं पुरारिपाद प्रणतिरत्नागरीमिवामराणां ।

फुत्कारोपहता फणीन्द्रशिरसि क्रोडानने दंष्ट्रया
विद्धा क (कू) र्मकठोरपृष्ठकपणैः पीडामुपेताचिरं ।
कार्णाटाधिपमन्त्रिणि प्रविलसत्कीर्तिप्रताने महो
दानौघव्यसने नयैकसुहृदि क्षोणी सुखं वर्तते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्यायोपार्जितवैभवे (वै) र्व्वहुमहादानप्रदोता कृती
मीमांसानयतर्ककर्क्कशधिया सृष्ट्वा समाजं सतां।
तात्पर्य्यं परितः परिक्ष्य बहुशो दृष्ट्वा निबद्धानसा
वाम्नायस्मृतिनिर्ण्णयाय कृतवांस्तान् सप्त रत्नाकरान् ॥

श्रीचण्डेश्वरमन्त्रिणा मतिमतानेन प्रसन्नात्मना
नेपालाखिलभूमिपालजयिना धर्मेन्दुदुग्धाब्धिना।
वाग्वत्या (:) सरितस्तटे सुरधुनीसाम्यं दधत्या (:) शुचौ,
मार्ग्गे मासि यथोक्तपुण्यसमये दत्तस्तुलापूरुषः ॥

गर्गोऽस्याहमिहिरः स च भोजराजः
स श्रीपतिर्म्मुनिवरः स पराशरादिः।
एकैककोपि न जगाद पुरा समस्तं,
ग्रन्थेन कर्म्म सकलं किल संकलय्य ॥
प्रचुरतरनिबन्धान्वीक्ष्य विख्यातकर्म्मा,
बहुतरमुनिवाक्यान्येष सम्यग्विचार्य्य।
स्वरुचिरघटनाभिः संकलय्यात्र सर्व्वं,
प्रचरदिह विदित्वादिश्य जीवेश्वरादीन् ॥
सत्कीर्त्तिपूरपरिपूरितदिङ्मुखश्री,-
चण्डेश्वरो जयति जङ्गमपारिजातः।
श्रीमान् समस्तजगतां स हिताय कृत्य,-
चिन्तामणिं सचिवमौलिमणिः करोति ॥

शशाङ्कतारयोः शुद्धिः, कर्त्तव्या सर्व्वकर्म्मसु।
ग्रहाणामपि सर्व्वेषां, तच्छुद्धौ हि विशुद्धता ॥

Nepal Sanskrit University, Balmeeki Campus, K...

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

[इत्यादि] [अन्ते तु]

वराहसंहितायां ॥ पादौ मूले जंघे च रोहिणी जानुनी तथाश्विन्यः ।
ऊरू चाषाढद्वयगुह्यं फल्गुनीद्वगलं ॥
कटिरपि च कृत्तिका पार्श्वयो(:)चाषाढा भवन्ति भाद्रपदाः ।
कुक्षिस्था रेवत्यो विज्ञेयमुरोनुराधा च ॥
पृष्ठं विद्धि धनिष्ठा भुजौ विशाखा स्मृता करौ हस्तः ।
भङ्गुल्यग्रं पुनर्व्वसुरश्लेषासंज्ञिताश्च नखाः ॥
ग्रीवा ज्येष्ठाश्रवणश्रवणौ पुष्यो मुखं द्विजाः स्वाति ।
हमिति शतभिषगथ नासिका मघा मृगशिरो नेत्रे ॥
चित्रा ललाटसंस्था शिरो हरिण्यः शिरोरुहाश्चार्द्राः ।
नक्षत्रपुरुषकोयं कर्त्तव्यो रूपमिच्छद्भिः ॥
चैत्रस्य बहुलपक्षेष्टम्यां मूलसंयुते चन्द्रे ।
उपवासः कर्त्तव्यो विष्णुं संपूज्य धिष्ण्यञ्च ॥
दद्याद्व्रते समाप्ते तु, घृतपूर्णभाजनं सुवर्णयुतम् ।
विप्राय वेदविदुषे सरत्नवस्त्रं स्वशक्त्या वा ॥
अन्नैः क्षीरघृतोत्कटैश्च सगुडैर्विप्रान् समभ्यर्च्चये,
दद्यात्ते पु सुवर्णवस्त्ररजतं लावण्यमिच्छन्नरः ।
प्रो(पा)दर्क्षप्रभृतिक्रमादुपवसन्नङ्गर्क्षनामस्वपि,
कुर्यात् केशवपूजनञ्च विधिना धिष्ण्यस्य पूजां तथा ॥
शरन्मलपूर्णचन्द्रमुखतसदृशः सु(मु)खी सरोजदलनेत्रा ।
रुचिरदशनसुकर्णा भ्रमरोदरसन्निभैः केशैः ॥
पुंस्कोकिलसमवाणी ताम्रोष्ठी पद्मवर्णकरचरणा ।
स्तनभारानतमध्या प्रदक्षिणावर्त्तया नाभ्या ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कदलीकाण्डनिभोरुः सुश्रोणी वरकुकुन्दरा।
सुश्लिष्टाङ्गुलिपादा भवति प्रमदाथ पुरुष।
प्रलम्बबाहुः पृथुपीनघक्षाः, पक्षाकरास्यः सितचारुद...
गजेन्द्रगामी कमलायताक्षः, स्त्रीचित्तहारी स्मरतुल्यमूर्त्तिः ॥

यावन्नक्षत्रमाला विचरति गगने भूषयन्ती हि भासा,
तावन्नक्षत्रभूतो विचरति सह तैत्र(व्र)ह्मणोह्नो विशेषं।
कल्पादौ चक्रवर्त्ती भवति हि मतिमान् पण्डितश्चापि भूयः,
संसारे जायमानो भवति नरपति त्रा(व्रा)ह्मणो वा धनाढ्यः ॥
ये तन्त्रैकनिष्ठे...विदोपमतयो ये तार्किकाः शाब्दिका,
ज्योतिश्शास्त्रविदो भवन्तु भुवने येपि प्रयासं विना।
ज्योतिर्ज्ञाश्च महीतले सुमनसः सर्व्वे कृतार्थाः कृताः,
श्रीचण्डेश्वरमन्त्रिणा विरचितो यत्कृत्यचिन्तामणिः ॥
नेपालाद्या विपक्षा रणभुवि विजिता येन यद्भूरियज्ञैः,
संतुष्टः स्वर्गलोके हरिरपि महिता येन जीवेश्वराद्याः।
श्रीमन्मन्त्रीशचण्डेश्वर इह विदितो यो महीकल्पवृक्ष,
स्तस्याचन्द्रार्कमेषा कृतिरिति विमला राजतां विश्ववन्द्या॥

इति श्रीसप्रक्रियमहासान्धिविग्रहिक. ठक्कुरश्रीचण्डेश्वरविरचिते कृत्यचिन्तामणिर्नामग्रन्थः समाप्तः ॥ ॥

क्रियपाथेयषड्वर्षे, सहामासे च पाण्डुरे।
सोमे तिथौ धातृभेर्क्षे, वारे संपूर्णतामवत् ॥

देवीं स्मरत्वा रिपुजितप्रशूरः सुहृद्विजानां हृदि सौख्यकारी।
नेपालभूमण्डलचक्रवर्त्ती श्रीप्राणमल्लो भुवने प्रजीयात् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

। कृत्यचिन्तामणिग्रन्थं, सारात्सारसमुत्तमं ।
वराहसंज्ञः दैवज्ञहरिवर्म्मेण, लिखितः स्वार्थहेतुना ॥

भग्नपृष्ठकटिग्रीवा, तन्धदृष्टिरधोमुखः ।
कष्टेन लिखिता पुस्ती, पुत्रवत् परिरक्षतु ॥शुभः ॥
भीमस्यापि भवेद्भङ्गो व्यासस्यापि मतिभ्रमः ।
यथा दृष्टं तथा लिखितं, लेखके नास्ति दूषणं॥

इति

(केनापि वाग्वत्यां प्रवाहितलब्धप्रथमपत्रे)

श्रीगणेशाय नमः ॥ सन्धिविग्रहमन्त्रीन्द्रदे[illegible]न्नृभवः ।
भूमिपालशिरोरत्नरंजितांहिसरोरुहः। १॥
सन्धिविग्रहिकः श्रीमद्धीरेश्वरसहोदरः ।
महामहत्तकः श्रीमान् विराजति गणेश्वरः ॥२॥
श्रीमता रामदत्तेन मन्त्रिणा तस्य सूनुना।
पङ्क्तिः क्रियतेधर्म्या रम्या धाजसनेयिनाम्।३।
अथवरणी ॥ (इत्यादि)

अत्र पत्राणि २३६ षट्त्रिंशदुत्तरशतद्वयम्। मध्ये पत्रद्वयं नष्टम्। हरितालालिप्तनेपालकर्णालम्। एकस्मिन् पृष्ठे ११ एकादश पङ्क्तयः। एकत्र पत्रे २२ द्वाविंशतिः पङ्क्तयः। एकस्यां पङ्क्तौ प्रायः ३७ सप्तत्रिंशत् अक्षराणि। १२ द्वादशाङ्गुलायामः। ४ चतुरङ्गुलव्यायामः। मध्यवर्तीनि पत्राणि घुणैर्जर्जरितानि। एको मध्ये वेधः। पालीशैलीमात्राभाङ्मैथिलीशैलीवर्णा प्राचीना नेपाललिपिः (६) १८२ व्यशीतियुतशतं प्रकाशाख्याः परिच्छेदाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कृत्यचिन्तामणौ कृताः। पाठभेदा भविष्यन्ति भूरिशो ऽ
मयं ग्रन्थो ऽनङ्गनाथपौड्यालस्य वर्त्तिसपुत्तलीषा
स्ति। प्रायः सार्धचतुश्शताधिकसमा लेखात् प्रयाव
आद्यन्तोद्धरणेन सर्वविषयः सद्भिः समालोच्यताम्
मिथिलाधिपस्य सचिवः श्रीप्राणमल्ले नृपे। नेपाले हरिवम
लिखितं ज्योतिर्मयं पुस्तकम् ॥

योगी नरहरिनाथः



ॐ

कृत्यतत्त्वार्णवः



अत्र १११ एकादशोत्तरमेकशतं पत्राणि। हरितालहीननेपालकगलम्। १३ अङ्गुलानि लम्बतया। ५ अङ्गुलानि व्यायततया। उभयतोमूषकदष्टानि। क्वचिद् १० दश। क्वचित् ११ एकादशदपङ्क्तयः। नेपाललिपिः। कर्मकाण्डविषयः। अयमप्यनङ्गनाथप्रौढालयस्यान्तिकेऽस्ति। अयमुपक्रमः ——

१ ॐनमः शिवगणेशाभ्यां ॥

श्रीगोविन्दपदाम्भोजद्वंद्वमद्वंद्वसाधनं
वन्दे वृन्दारकधुनीमकरन्दमनोहरं ॥
श्रीकराचार्यपुत्रेण श्रीमच्छ्रीनाथशर्मणा।
प्रीतये विदुषां चक्रे कृत्यकालविनिर्णयः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कालकृतो विरोधः प्रायः सदैव प्रथितो बुधानां ।
वराहसं[illegible] कृते मुनीनां, विचार्य वाचोऽभिदधामि तत्वं ॥
देशिविदु पांमतितमाकलय्य,
क्षोदक्षमं यदभिलिख्य समर्पयामि ।
तद्धां बुधा वितथगड्डरि(लि)काप्रवाहे,
दूराद्विहाय कुरुतादरमत्र गाढं ॥
इत्यादि । अन्ते च ———

इति श्रीलश्रीनाथाचार्य्यचूडामणिविरचितः कृत्यतत्वार्णवः समाप्तः ॥ शुभं ॥ लिखितं श्रीसूर्यरामेण [illegible] ७६१ आषाढ-शुक्ल सप्तमी ..... ५ दिने सम्पूर्णमिति ॥ यथा दृष्टं तथाऽलेखि दोषकं नास्ति लेखके । शोध्यतां गुणिभिरिदं ॥ शुभं ॥ इत्येवम् ।

योगी नरहरिनाथः

ॐ

कृत्यरत्नावली

अत्र पत्राणि ६७ सप्तषष्टिः । हरितालिप्तान्येकत्र । नेपालकर्गलं तनु । प्रायः पूर्वतुल्यायामव्यायामौ । इयमप्यनङ्गनाथसमीपे समग्राऽऽदावित्थम् ———

श्री गणेशायनमः ॥ नमस्कृत्य रमानाथं भट्टविदूलसूनुना ।
कृत्यरत्नावली रम्या तन्यते विदुषां मुदे ॥
तत्र चैत्रशुक्लप्रतिपदि वत्सरारम्भविधिस्तत्र प्रतिपदौदयिकी ग्राह्या ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चैत्रे मासि जगद्ब्रह्मा ससर्ज प्रथमेहनि ।
शुक्लपक्षे समग्रं तु तदासूर्योदये सति ॥ इत्यादि ।

अन्ते तु—

फाल्गुनामावास्या मन्वादिः । फाल्गुनस्य त्वमावास्येतिमात्स्यात् । साचापरान्हिका ग्राह्या कृष्णपक्षेगतत्वादिति ॥ भूतशून्यऋषिचन्द्रमितेब्दे माघकृष्णगहरौ रविवारे । ग्रंथपूर्तिमकरोत् किल रामः श्रीरमापतिसमर्पणबुध्या ॥

तत्स द्वंशप्रसूतो यो रामचन्द्रेतिविश्रुतः ।
तेनेयं निर्मिता सम्यक् कृत्यरत्नावली शुभा ॥
अनया प्रीयतां लक्ष्मीर्नृसिंहो भक्तवत्सलः ।
कुलदैवतमित्येतदुद्रष्टृणां स्याच्छुभा मतिः ॥

इति श्रीमद्वेदतदर्थाभिज्ञतत्सद्वालकृष्णभट्टसुतविट्ठलभट्टसूरिसूनुभट्टरामचन्द्रविरचिता कृत्यरत्नावली समाप्ता ॥ नैपालाब्दे भाग्निदुर्गे संमितेर्के नृयुग्मगे । गिरिजायां तिथौ कृष्णे लिखितं बुधवासरे । शुभम् ॥ (इति)

योगी नरहरिनाथः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ

[गरुडनारायण-(चाँगु नारान्) मन्दिर-पश्चिम-द्वार-
सम्मुख-धर्मशाला-भित्तौ]

काष्ठमण्डपाधिराज-भूपालेन्द्रमल्ल-मातुर्देव्या ऋद्धिलक्ष्म्याः

शिलालेखः

ॐ नमः श्री ३ गरुडनारायणाय ॥

वाणी यस्य किल [illegible] पुनः,
पादाङ्गुष्ठतलान्नदी त्रिपथगा यस्याविरासीत्पुरा ।
धत्ते यस्त्रिपुरारिसेवनवशात्त्रित्वं त्रिधामाश्रितं,
त्रैगुण्यादुदितः श्रिये स भवताद्वे वस्त्रिलोकीपतिः ॥१॥
यस्याम्भोनिधि (गर्भम) स्ति भवनं रत्नप्रकाशोज्ज्वलं,
कण्ठे कौस्तुभभूषणं यदुदितं यत्कन्यका कामिनी ।
यत्पुत्रो नयनं यदन्तरचरः शय्या भुजङ्गेश्वरः
सोयं ..... र्त्तयो जलनिधिः सर्व्वेश्वरः सर्व्वदः ॥२॥
मीनोभूच्छ्रुतिरक्षणाय कमठो मन्थाचलालम्बने,
वाराहं वपुरादधे क्षितिधृतौ सैहीं तथा वामनीं ।
भक्त्या क्षत्रियराक्षसक्षि(क्ष)तिकृते राम (मस्)त्रयीं(यी)निन्दको,
बुद्धोभूद्घनक्षयाय भविता (ता) कल्की स भूयाच्छ्रिये ॥ ३ ॥
यः कंसं निजघान भानुतनयातीरे च गाश्चारयन्,
वृन्दारण्यगतो रसेन विवशश्चिक्रीड गोपांगणैः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पञ्चत्वं गत एव येन च गुरोरानीय दत्तः शिशुः,
श्रेयः श्रीपुरुषोत्तमो दिशतु वः पीताम्बरः सुन्दरः ॥४॥
भूत्वा भारतभूतलेखिलमहीभारावताराय य,
श्चक्रे भारतमुद्धतैर्न्नृपगणैर्दैत्यावतारोन्नतैः ।
येनाग्निस्त्रिदशाधिपस्य विपिनत्यागेन सन्तोषितो,
भक्तानां भवतान्नराकृतिरसौ देवो मुदे वो हरिः ॥५॥
अश्वत्थस्सकलेषु शाखिषु गिरिश्रेणीषु हैमाचलो,
(वेदेषु-छन्दस्सु) प्रणवो नृषु क्षितिपतिर्देवेषु यो वासवः ।
सेनानीषु षडाननो निगदितो वर्णेषु च ब्राह्मणो,
विष्णुः [illegible] ..... ॥६॥
शैवाः शम्भुधिया गणेशपथगा विघ्नेशबुद्ध्या पुनः,
सौराः सूर्य्यधिया च वैष्णवगणा गोविन्दबुध्यापि च ।
शाक्ताः (शक्तिधिया भजन्ति स) ततं यं सर्वदेवेश्वरं,
स श्रीमान् श्रियमातनोतु भजतां सर्व्वातिरिक्तो हरिः ॥७॥
ये (य)न्ध्यायन्ति सुरेश्वरप्रभृतयः सर्व्वा (.....),
..... न विलीयते त्रिभुवनं भ्रान्तिप्रकाशोज्झितं ।
यज्ज्ञानेन विना जगत् प्रकुरुते शार्द्दूलविक्रीडितं,
दोलाद्रौ स्थिरतां गताय (हरये कस्मैचिदस्मै न)मः ॥८॥
पठति यः प्रयतः स्तवमोदरात्, स भविता भवितापनिवारितः ।
सकलसिद्धमनोरथसङ्गत, स्तनुमतां नु (मतां .. ..) : ॥९॥

इति श्री ३ भक्तजनोद्धारणकृतनानावतारप्रसिद्धमहामहिम्नो भगवतः श्रीगरुडनारायणस्य सर्वमनोरथ (सिद्धिस्तोत्रं) समाप्तं ॥ ॐ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

देवी श्रीऋद्धिलक्ष्मीर्जिजननमहीप्राप्तपुण्यातिरेका,
ऋत्विग्भिर्ल्ब्धमन्त्रैर्गुणगणविदितैः (.....)।
(घ) स्त्रालङ्कारभूयस्तुरगशतमथ स्पर्शयन्ती द्विजेभ्यो,
नानासम्भारसंभावितभुवनतलानन्दसन्दोहभूमिः ॥१॥

तत्पु (त्रःक्षितिपालमौलितिलको) विद्याविनोदप्रियो,
दाता प्रौढतरप्रतापविदितप्रोद्दण्डचण्डद्युतिः।
कीर्तिक्रान्तदिगन्तरालविदितो विद्व (ज्जनानन्ददो,-
भूपा) लेन्द्र इति प्रथामुपगतः कान्तीपुरीभूपतिः ॥२॥

दोलाद्रौ येन देवा (ह्यौ) गरुडगतिरसौ [illegible]
.....
मन्यन्ते राजराजं निजविभवजितं किञ्च तेषां रमण्यो,
हारा (रो) भार ..... तो(ता)श्चित्तमुद्धर्त्तयन्ति ॥ ३ ॥

नेपाले वर्षवर्ये श्रुतिहिमकिरणेभोक्षते माघि पौषे,
चक्रे ऽग्निस्थापनं सा रसवन [illegible] (मते.....।)
नव्यं शीर्षं विधाय व्यधित सह हरेस्तोरणेन प्रतिष्ठां,
तत्पश्चान्माघि तस्मिन्नवितिथिसहिते होमपूर्तिं चकार ॥४॥

शुभमस्तु ॥ अतः परं देशभाषा, श्रीश्रीश्री गरुडनारायण-प्रीत्यि श्रीमत्पशुपतिचरणकमलधूलिधूस (स्तिशिरोरुहश्रीमन्) मानेश्वरीष्टदेवतावरलब्धप्रसाद, देदीप्यमानमानोन्नत, श्रीरघुवंशावतारविकुर्लातिलकहनु (मद्ध्वजनेपा) लेश्वरमहाराजोधिराजविदग्धचूडामणिराजराजेन्द्रसकलराजचक्राधीश्वर, श्रीश्रीजयभूपालेन्द्रमे (ल्पपरम) भट्टारकदेव स, जननी श्रीश्रीऋद्धिलक्ष्मीदेवी न,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रीमत्कान्तिपुरमहानगरे न, चंगु विज्याङाव, पौष कृष्ण षष्ठी (तिथौ) अग्निस्थापन याङा विज्याङाव, माघशुक्ल दशमी कुन्हु, जीर्णोद्धार याङाव, लू या तोरण तया ओ, प्रतिष्ठा याङ विज्याङा, थ्वनं लि फाल्गुण शुक्ल सप्तमी कुन्हु कोट्याहुति यज्ञ या पूर्ण याङ विज्याङा, श्रीब्राह्मण जु पनिस्त किसि ह्यं छि १ सल ह्यं १०८ साहां १०८ मेस ह्यं १०८ बोलस ह्यं १०८ फसि ह्यं १०८ वस्त्र दक्षिणा(मु)युति, घीर्वेल्ली, थ्वते प्रसन्न जु से विज्याङा, थ्वया साहालन रोहो तस्थे विज्यात, थ्व साहालन रोहो, गोडा राजोनं, सुनानं सेनका थो सकसां गुप्त याङाकन थ्वां ब्रह्महत्या, गोहत्का, गुरुहत्वा, बालहत्वा, स्त्रीहत्यां, थ्वते पंच महापातक लाक जुरो, श्रीश्रीश्रीगरुडनारायण या कृदृष्टि जुरो, थ्व लोहो निदान याङाव सनसां, आतुरारोग्य जन धन लक्ष्मी सन्तान वृद्धिरस्तु, थ्वते भाषा या हुइसाक्षि, श्रीमदु यावच्चन्द्रार्कमेदिनी ॥ संवत् ८१४ फाल्गुण मासे शुक्लपक्षे सप्तम्यान्तिथौ, रोहिणीनक्षत्रे, विष्कम्भयोगे, बुधवासरे थ्वकुन्हु लोया दिन जुरो, लिखितं, राजदैवज्ञ, धर्मध्वज भारो न ॥ श्रीश्रीश्रीगरुडनारायणप्रीतिरस्तु। शुभं भूयात् ॥

अत्र शिलायां ३३ त्रयस्त्रिंशत् पङ्क्तयः। नेपाललिपिः। २ ॥ सार्धहस्तद्वयायामः। १ एकहस्त १० दशाङ्गुल्यश्च व्यायामः। ७ सप्ताङ्गुलं स्थौल्यम्। मध्ये चक्रं पार्श्वयोश्चन्द्रौ। पश्चिम-धर्मशालाभित्तौ स्थितिः। मध्ये खण्डितः

पं. बुद्धिसागर पराजुली

Nepal Sanskrit University, Patmadi C...

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

[अत्रैव गरुडनारायण-प्रासाद-पश्चिम-प्रतीहारे खण्डित-
मानदेव-जयस्तम्भ-मूल-दक्ष-पक्षे काष्ठमण्डपाधिराज-
भूपालेन्द्रमल्ल-भुवनलक्ष्मीदेव्योर्दम्पत्योः
प्रतीकपादपीठे हैमेऽभिलेखः]

धं १ पीताम्बरः शंखगदाब्जचक्रप्रभासमूहासितपाणिपद्मः ।
गणैस्समेतो गरुडाधिरूढो नारायणो मङ्गलमातनोतु ॥
संस्थापिता कनकनिर्मितमूर्त्तिरेखा (षा)
भूपालभर्तृसहिता ललिता स्वकीया ।
मुक्त्याप्तये [illegible]
प्रासादनिर्म्मितियुता भुवनादिलक्ष्म्या (क्ष्म्याः) ॥

शुभम् ॥ ॥ सम्वत् ८२४ फाल्गुणशुक्लद्वितीयायान्तिथौ उत्तरभद्रनक्षत्रे शुक्रयोग शुक्रवार थव कुन्हु ॥ श्रीश्रीश्रीगरुडनारायणदेघस्ते देवल याङाव कोट्याहुति यज्ञ याङाव, गजुरि स्थायोव श्रीश्री भुवनलक्ष्मीदेवी न थव पुरुख (ष) ॥ श्रीश्री जय भूपालेन्द्रमल्लदेव सं, थव सारिक लुन दय का जे तया ॥शुभ ॥

[अत्रैव कीलेश्वरमन्दिरद्वारि ताम्रपत्रे]

१ स्वस्ति श्रीगणेशाय नमः मासे वैशाख शुक्ल तृतीया का दिन महा श्रीश्रीश्री कीलेश्वर सदाशिव प्रीतये ताम्रपात्र जलहरि शिवप्रीति गरि चढाव्यू भारद्वाज गोत्रोत्पन्न धनराज षड्का सुवेडि का ज्येष्ठ पुत्र रामाजित षड्का महालक्ष्मीदेवीवामाङ्गि सहितशिवलोकप्राप्तिकामनार्थे सर्वोपद्रशान्त्यर्थे कायिकवाचिकमानसिकपापक्षयार्थे पुनर्जन्मनिवारणार्थे शिवार्पणमस्तु क्षमस्वः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रीशाके १७०२ श्रीसंवत् १८३७ शुभनेपालसंवत् ९०० शुभमस्तु

अत्रैव नारायणस्य पृष्ठभागेऽनल्पशिल्पकल्पित-प्राचीननीलशिलामयखण्डितगरुडनारायणमूर्तिपादपीठे पूर्वस्यां दिशि पारिजातमूले प्राचीनगुप्तलिपौ षट्पङ्क्तिर्लेखः खण्डित-प्रायो विद्यते। अस्यैव पार्श्वे देवनागर्यामेको लेखोऽन्यः। अग्निकोणे गणेशपादपीठे नेपाललिप्यां नातिप्राचीनायांचतुःप-ङ्क्तिर्लेखः। प्रासादपटलप्रान्तयोरपि सुघर्णाक्षराणि सन्ति। यत्र-श्रेयोऽस्तु संवत् ८२९ ज्येष्ठमासे शुक्लपक्षे दशम्यां तिथौ-इत्यादिलेखो वर्तते। अवतरणकाले नीचैर्नृदुर्गास्थापनस्थाने प्राचीनशिवलिङ्गपीठ [illegible] प्राचीनगुप्ताक्षरैः सूक्ष्मैः पञ्चपङ्क्तिर्लेखोऽस्ति। पलाश्लोकमहिषमर्दिनीसमकालिक कसमशिलामय्यो लोकेश्वरत्रिविक्रम-नरसिंह-गरुडध्वज-सप्ताश्व-पद्मपाणि-लकुलीशशै-लीशिवलिङ्गानन्तादिनानादेवतानां खण्डिता व्यस्ताः स्थाने स्थाने दुःस्था दृश्यन्ते मूर्त्तयः। न जाने भूगर्भे दिगन्तरे वा गताः कति कति मूर्त्तयः स्युः! नीचैर्जलप्रणाली कूपश्च विद्यते प्राचीनौ। यत्राभिलेखेन भाव्यम्। नाधुनोपरि दृश्यते नष्टो वा भुवो गर्भे वा स्यात्। स्थानमतिप्राचीनमनन्य-सदृशं च। यतो निखिलं नेपालमण्डलं लोचनगोचरीक्रियते। अत्र मानस्तम्भवामभागे स्तम्भापेक्षया पुराणी धृष्ट प्राया कठिना १ एकहस्तव्यायामा ३ त्रिहस्तायामा ३६ षट्त्रिंशत्पङ्क्तिः शिला-लिपिर्गरुडपृष्ठसक्ताऽतीव कदर्थिता भूमावधेनिमग्ना विद्यते। हन्त! पुरावृत्तस्य दुर्दशा सतां क्षेत्रेः खेदयति।

योगी नरहरिनाथः

Nepal Sanskrit University, Valmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

[नेपाल-मण्डल-मण्डन-दोलाद्रि-शिखर-शेखर-गरुड-नारायण (चाँगुनारायण)-प्रासाद-पश्चिम द्वार-दक्ष-पक्ष-स्थितः]

श्रीमानदेवजयस्तम्भाऽभिलेखः

संवत् ३८६ ज्यैष्ठमासे शुक्लपक्षे प्रतिपदि-
(रे)हिणीनक्षत्रयुक्ते चन्द्रमसि मुहूर्त्ते प्रशस्तेभिजिति-
(श्री) वत्साङ्कित दीप्तचारुवपुलप्रोद्वृत्तवक्षस्थलः
(श्री) वक्षस्तलाऽऽसङ्ग (रुचिर) [नि]र्व्यक्त प्रमोदोत्सवः
(त्रै) लोक्यभ्रमयन्त्रवर्त्तिचक्र (विधु) व्यासङ्गनत्यान्वयः
(दो) लाद्रौ निवसन्नयत्य न (मे) वैरभ्यर्च्यमानो हरिः १
(श्रीम) द्भारु(सा) यतापविभ (वैर्व्या) यामसंक्षेपकृत्
(राजा) भूद्वृषदेव इत्यनुप (मः स) त्यप्रतिज्ञोदयः
(यो रेजे) सवितेव दीप्तकिर (णैः) सम्यग्भ तैः स्वैः सुतैः
(वि)द्वद्भिर्ब्बहुगर्ब्बितैरचपलैः शू(रै) र्विनीतात्मभिः २
(त) स्याभूत्तनयः समृद्ध (तेर) यः सङ्ख्येयजेयोरिभिः
(राजा) शङ्करदेव इत्यनुप (मः, दीप्तिवदः (भूति)सत्यधीः
(सो) यं चिक्रमदन्तमानवभ [व] ल्लब्ध्वा यशः पुष्कलम्
(य)ः संयम्य ..... ररक्ष भामिभमतैर्भूत्यैर्भृगेन्द्रोपमः ३
(त)स्याप्युत्तमधर्म्मकर्म्मण [..... विद्धार्मिकः
(ध)र्म्मजो वितयेष्वनुरक्तमगु [णः श्रीध] र्म्मदेवो नृपः
(श्र)र्णैव कुलक्रमागत ..... राज्यं महत्
(स्की)र्त्तीहत्य नवैर्न्नृपैर्विचरितै [:सम] भाव्य चेतो नृणाम् ४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(२) जे स [त्प] शुभिः सुरानु ·····: सम्पन्नमन्त्रर्द्धिभिः
(मानी वंश) विशुद्धदेहहृदयश्चन्द्रद्यु तिः पार्थिवः
(प) त्नी तस्य विशुद्धवंशविभवा श्रीराज्यवत्युत्तमा
(प्रा)णा[नाम] भवत् [प्रिया कुलशु[णै] र्ल्लक्ष्मीरिवाग्र्याहरेः ५
····· रतेर्य्यशोंशुभिरिदं व्याभाष्य [स्य] कृत्स्नञ्जगत्
याति स्म त्रिदिवालयं नरपतावुद्यानयात्रामिव
प्रम्लाना ज्वरविह्वलाकुलज ·····नेकमन्दा तदा
देवाहारविधिक्रियास्वभिरता तद्विप्रयोगात्पुरा ६

[illegible] [स्यु. दा[illegible]

देवी राज्यवती तु तस्य नृपतेर्भार्य्याभिधाना सती
श्रीरेवानुगता भविष्यति तदा लोकान्तरासङ्गिनी
यस्याञ्जात इहानवद्यचरितः श्रीमानदेवो नृपः
कान्त्या शारदचन्द्रमा इव जगत्प्रल्हादयन्सर्व्वदा ७
प्रत्यागत्य सगद्गदाक्षरमिदन्दीग्घं विनिश्वस्य च
प्रेम्णो पुत्रमुवाच साश्रुवदना यातः पिता ते दिवं
हा पुत्रास्तमिते तवाद्य पितरि प्राणैर्व्वृथा किम्मम
राज्यम्पुत्रक कार्य्याहमनुयाम्यद्यैव भर्त्तुर्ग्गतिम् ८
किम्मे भोगविलासविस्तरकृतैराशामयैर्ब्बन्धनैः
मायास्वप्ननिभे समागमविधौ भर्त्रा विना जीवितुम्
यामीत्येवमवस्थिता खलु तदा दीनात्मना सूनुना
पादौ भक्तिवशान्तिपीड्य शिरसा विज्ञापिता यत्नतः ९
किम्भोगैर्म्मम किं हि जीवितसुखैस्त्वद्विप्रयोगे सति
प्राणान्पूर्व्वमहञ्जहामि परतस्त्वं यास्यसीतो दिवम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्येवम्मुखपङ्कजान्तरगतैर्न्नेत्राम्बुमिश्रैर्दृढम्
वाक्पाशैर्व्विहगीव पाशवशगा बद्धा ततस्तस्थुषी १०
सत्पुत्रेण सहौर्द्ध्वदेहिकविधिं भर्त्तुः प्रकृत्यात्मना
शीलत्यागदमोपवासनियमैरेकान्नशुद्धाशया
(वि) प्रेभ्योपि च सर्व्वदा प्रददती तत्पुण्यवृद्ध्यै धनम्
तस्थौ तद्धृदया सतीव्रतविधौ साक्षादिवारुन्धती ११
पुत्रोप्यूर्ज्जितसत्त्वविक्रमधृतिः क्षान्तः प्रजावत्सलः
कर्त्ता नैव विकत्थनः स्मितकथः पूर्व्वाभिभाषी सदा
तेजस्वी नच लङ्घितो नच [illegible] श्रितः
दीनानाथसुहृत् प्रियातिथिजनः प्रत्यर्थिनां माननुत् १२

[३]

अस्त्रापास्त्रविधानकौशलगुणैः प्रज्ञातसत्पौरुषः
श्रीमच्चारुभुजः प्रमृष्टकनकश्लक्ष्णोवदातच्छविः
पीनांसो विकचासितोत्पलदलप्रस्पर्द्धमानेक्षणः
साक्षात्काम इवाङ्गवान्नरपतिः कान्ताविलासोत्सवः १३
यूपैश्चारुभिरुच्छ्रितैर्व्वसुमती पित्रा ममालङ्कृता
क्षात्रेणाजिमखाश्रयेण विधिना दीक्षाश्रितोहं स्थितः
यात्राम्प्रत्यरिसङ्क्षयाय तरसा गच्छामि पूर्व्वान्दिशम्
ये चाज्ञावशवर्त्तिनो मम नृपाः संस्थापयिष्यामि तान् १४
इत्येवञ्जननीमपेतकलुषां राजा प्रणम्योचिवान्
नाम्बानृण्यमहन्तपोभिरमलैश्शक्नोमि यातुम्पितुः
किन्त्वाप्तेन यथावदस्त्रविधिना तत्पादसंसेवया
बास्यामीति ततोम्बयातिमुदया दत्ताभ्यनुज्ञो नपः १५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रायात्पूर्व्वपथेन तत्र च शठा ये पूर्व्वदेशाश्रयाः
सामन्ताः प्रणिपातबन्धुरशिरःप्रभ्रष्टमौलिस्रजः
तानाज्ञावशवर्त्तिनो नरपतिः संस्थाप्य तस्मात्पुनः
निर्भीः सिंह इवाकुलोत्कटसटः पश्चाद्भुवञ्चक्रिवान् १६
सामन्तस्य च तत्र दुष्टचरितं श्रुत्वा शिरः कम्पयन्
बाहुं हस्तिकरोपमं स शनकैः स्पृष्ट्वाब्रवीद्गर्व्वितम्
आहूतो यदि नैति विक्रमवशादेश्यत्यसौ मे वशं
किं वाक्यैर्ब्बहुभिर्व्वृथात्र गदितैः संक्षेपतः कथ्यते १७
अहं [illegible] एवस्पर्द्धिनीम्
भीमावर्त्ततरङ्गचञ्चलजलान्त्वङ्गैंडकीमुत्तर
सन्नद्धैर्ब्बरवाजिकुञ्जरशतैरन्वेमि तीर्त्वा नदीम्
त्वत्सेनामिति निश्चयान्नरपतिस्तीर्णप्रतिज्ञस्तदा १८
जित्वा मल्लपुरीन्ततस्तु शनकैरभ्याजगाम स्वकम्
देशं प्रीतमनास्तदा खलु धनं प्रादाद् द्विजेभ्योक्षयम्
राज्ञी राज्यवती च साधुमतिना प्रोक्ता दृढं सूनुना
भक्त्याम्ब त्वमपि प्रसन्नहृदया दानं प्रयच्छ स्वत (:)(त्) १९

इत्यादि नीचैः खण्डितम् । अयं स्तम्भश्चतुरस्रः । ३ ॥ पादोनहस्तचतुष्टयवेष्टनपीवरः । इदानीं भूमेरुपरि ८ अष्टहस्तलम्बः । पूर्वं सम्मुख एवासीत् । शेखरकमलेऽभिमुखो गरुड आसीत् । पश्चात् खण्डितः । गरुडोऽपि पतितः । इदानीं खण्डितमूलवामभागे पुराणशिलालेखाग्रे भूमौ विद्यते गरुडः । स्तम्भोपरिभागः केनापि पुण्यात्मना द्वारस्य वामभागे समुच्छ्रितः । तदुपरि चक्रं स्थापितम् । तुल्यपरिणाहं खण्डितजयस्तम्भमूलं २ द्विहस्तसमुच्छ्रितं भूमेरि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दानीमपि सम्मुख एवास्ति। यत्राभिमुखं खण्डमूले लेखो ऽधुनापि पादोनपङ्क्तिचतुष्टयात्मको वर्वर्त एव। भङ्गस्थाने कतिप्यपङ्क्तयो नष्टाः। स्तम्भस्य त्रिषु पृष्ठेषु लेखः। खण्डिते च लेखस्य खण्डचतुष्कं जातं मूलसहितम्।

स्तम्भस्योत्तरपृष्ठे २६ षड्विंशतिः पङ्क्तयः प्राप्ताः। पश्चिमपृष्ठे २४ चतुर्विंशतिः पङ्क्तयः प्राप्ताः। दक्षिणपृष्ठे २८ अष्टाविंशतिः पङ्क्तयः प्राप्ताः। अन्या नीचैः खण्डिताः। स्तम्भमूले ३ ॥। पादोनपङ्क्तिचतुष्टयमधुनापि विद्यत एव। गुप्तलिपिःस्पष्टतरा। प्रौढतरा रचना। लिखिते इत्र स्तम्भ [illegible] नमस्कारः। प्रथमे पृष्ठे वामे भागे दात्रासिपुत्रकादिशस्त्राणां घर्षणेन गर्तत्रयं कृतं वर्तते। यत्र प्रायो द्वित्राण्यक्षराणि प्रतिपङ्क्ति घृष्टानि। पदांशेन समूह्य तानि कोष्ठेषु स्थापितानि। मध्ये च खण्डितानि पदाक्षराण्यनुमितानि (कोष्ठेषु) स्थापितानि। स्तम्भखण्डन इतिहासस्य महती क्षतिर्जाता। इत्थं खल्वत्र सर्वत्र प्रायः प्रमादोपेक्षाभ्यामितिहाससामग्री समग्रा ग्रासीकृता। शासकैरैतिहासिकैरखिलैश्च जानपदैरप्रमत्तैरस्यापि शिष्टस्य दिष्टतो रक्षा सुतरां कर्तव्या। इतिहासो नाम राष्ट्रस्य प्राणा भवन्ति। शत्रुणापि कृतो धर्मः पालनीयः स्वधर्मवत्। दानाच्छ्रेयोऽनुपालनम्। सामान्योऽयं धर्मसेतुर्नराणाम्। भविष्ये कुशलकांक्षिभिर्न प्रमदितव्यम्। उदारतया वर्तितव्यम्। देशाचारस्य कुलाचारस्य सदाचारस्य धर्मस्य जातेः राष्ट्रस्य रक्षा पूर्वजानां वृत्ते रक्षिते भवति। अत्र खलु कालमानमादौ गद्ये। ततः परं सर्वं शार्दूलविक्रीडिते पद्ये विद्यते। प्राक्करुणो रसः। पश्चाद् वीरो रसः। धर्मदेवे दिवङ्गते सहगमन-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्पराया मातू राजवत्याः पुत्रस्य युवराजस्य मानदेवस्य च संवादो हृदयस्पर्शी। ततो मानदेवस्योदात्तस्य जैत्रयात्रा यज्ञदानादिकं वर्तते।

नवरात्रमहोत्सवप्रवणतया काष्ठमण्डपमानदेवजयस्तम्भप्रभृतिलेखानामनुवादः कर्तुं न पारितः। सप्तमेऽङ्के प्रकाशमेष्यतीति विदितं भवतु भवतां पाठकमहानुभावानाम्। अथ च परेषामखिला लेखा ऐतिहासिका यथास्थिति प्रकाश्यन्ते। न खलु तत्र विभ्रमो भवतु तत्रभवताम्। मानदेवजयस्तम्भे शकसंवत्

[illegible] हरिनाथः

राज्ञः श्रीपृथ्वीनारायणस्य स्वान् सभ्यान् प्रत्युपदेशः

[अयमुपदेशो नेपालीभाषायां परम्परीण उपलभ्यते। तस्यैव भावस्य संस्कृतभाषायामनूक्तिरियम्]

क्रमागतः
स्वं साम्राज्यं वितन्वन् प्रसरति परितस्तोम्रवक्त्राधिराजः
सङ्ग्रामा भारतीयैर्नृपतिभिरसकृत् तस्य सीमासु सन्ति।
आपद्यैतै[1]कता चेद् भरतवसुमतीसंभवानां[2] नराणां
स्याद[1]स्माकं निपातो नियत इति हृदा चिन्तयत्याङ्गलराजः॥
॥ ६६ ॥

(१) हेतुहेतुमतोर्लिङ् (३ ३।१५६) (२) भारतीयानाम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तस्मादाङ्गलाधिपालोऽभिलषति नितरां दुर्गमे भूमिभागे
कर्तुं दुर्गं बलिष्ठं भवति हि विपदि स्वापसार[1]स्तु यत्र ।
नेपाले शैलदुर्गे प्रणिहितनयनस्ताम्रवक्त्राधिपोऽस्ति
तस्मान्नेपालरक्षा भवतु हि भवतां चिन्तनीया पुरस्तात् ॥

॥ ६७ ॥

(१) स्वकर्तृकमपसरणम् ।

स्थाने[1] युद्धेऽपसारे च समुचिततरान् भूमिभागान् समीक्ष्य
दुर्गाणां दुर्ग्रहा[2]णां भवतु विरचने सन्ततो यः प्रयत्नः ।
शत्रोर्माभूत् प्रलोभः [illegible]
कार्यः कूटावपातप्रहिखरसिकताकण्टकिन्यादिकीर्णः ॥

॥ ६८ ॥

(१) अवस्थितौ । (२) ईषदूदुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल् [३।३।१२६] । (३) कूटयन्त्रम् । (४) अवपातस्तु हस्त्यर्थे गर्तश्छन्नस्तृणादिना इति यादवः । (५) कूपः । (६) तीक्ष्णवालुका । (७) कण्टकयुता लतादयः । शत्रूणामापाते कूटावपातकण्टकिनीश्च स्थापयेत् । कौ. अ. १०।१।१२।

कस्मिंश्चित् स्वानुकूलेऽहनि कपटपटुस्ताम्रवक्त्राधिराजो
नेपालं जेतुकामो घटितबहुबलो निश्चयं विग्रहीता[1] ।
आङ्गले[2] युद्धे भवद्भिस्त्ववहितहृदयैः स्थायिता सेवनीया
यायित्वं युष्मदीयं भवति नहि पुरा[3] तत्र कल्याणदायि ॥

॥ ६९ ॥

(१) विग्रहं कर्ता (२) आङ्गला योद्धारोऽस्मिन् युद्ध आङ्गलं-युद्धम् , सङ्ग्रामे प्रयोजनयोर्दृघ्यः [४।२।५६] इत्यण् (३) पुरायो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गे भविष्यति लट्।

चूरेरद्रेर्नितम्बान्तर[1]मधिवसतस्ताम्रवक्त्रस्य योद्धॄन्
अस्मद्योधा विहस्तान[2] विदधतु सुतरां क्षीणतां[3] शत्रुराप्ता।
सङ्ग्रामे तत्र लब्धे प्रहरणवसुनी[4] पुत्रपौत्रीणभाव
मेतारौ जन्हुजायास्तटमपि च पुरा याति नेपालसीमा॥

॥ ७० ॥

(१) कटकोऽस्त्री नितम्बोऽद्रेरित्यमरः [२।३।५] मार्गैषिणीषा कटकान्तरेषु वैन्ध्येषु सेना बहुधा विभिन्ना। चकार रेवेव महाविराव बद्धप्रतिश्रुन्निगूहामुखानि [रघु. १६।३१] (२) विहस्तव्याकुलौ समावित्यमरः [३१।४३]। (३) युग्यपुरुषापचयः क्षयः (कौश्र (४) शस्त्रं धनं च (५) परोवरपरम्परपुत्रपौत्रमनुभवति [५।२।१०] इति खः।

भङ्गं[1] जन्ये[2]ऽनुभूयापि च विषयमिमं लिप्समानोऽनुनीतिं[3]
कारंकारं[4] स धूर्तः प्रियवचनशतैश्चाटुकारत्वमाप्ता।
नेपालं हस्तमाप्तं विरचयितुमनास्ताम्रवक्त्राधिराजः
सर्वोपायान् विधाता भवतु हि भवतां जागरूकत्वमत्र॥

॥ ७१ ॥

(१) पराजयम्। (२) युद्धे। (३) अनुनयम् (४) आभीक्ष्ण्ये णमुल् च ३।४ २२ इति णमुल्।

दुर्गं नेपालराष्ट्रं प्रणिपतति करे यस्य पुंसः स एव
न्यक्कर्तुं स्वेन धाम्ना प्रभवति चतुरः[2] सार्वभौमान् समेतान्।
आस्ते नेपालराष्ट्रं नियतिविरचितं सर्वयुद्धोपयुक्तं
दुर्गं शैलस्वरूपं न च मनुजकृता संस्क्रियाऽपेक्ष्यतेऽत्र॥

॥ ७२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

[१] अभिभवितुम् । [२] चतुः संख्याम् । [३] दैवं दिष्टं भागधेयं भाग्यं स्त्री नियतिर्विधिरित्यमरः १।४।२८।

फुल्लोच्चाख्ये[1] महीध्रे गिरिषु शिवपुरी-दापचा-पालुङेषु
चन्द्रागिर्याख्यशैले शिखरिणि हि महामण्डपे[2] काहुले च ।
स्थानेष्वेतेषु सप्तस्वपि दृढघटितैः प्रस्तरैः सञ्चितानां
दुर्गाणां दुर्ग्रहाणां भवतु विरचना तत्र योज्याः शतघ्न्यः ॥
॥ ७३ ॥

[१] फूलचोकी । [२] महादेउपोखरी ।

नेपालीभाषायां समुपलभ्यमानो मूलपाठः । अयमन्यत्रापि द्विर्मुद्रितः ।

सरजिमि मा परि रहेछ हिन्दुस्थानी जाग्यो भन्या कठिन पर्ला भनि किल्ला पोजन आउन्या छ सन्धि सरपनु हेरि गढि तुल्याई राषनु र रस्ता रस्ता मा भाजा हालि राखनु र यक दिन त्यो बल आउन्या छ जाई कटक न गर्नु भिकि कटक गर्नु र चुरे घाटि मा घुपै काटिन्या छ पाच सात पुस्ता लाई पजना पनि मिलने छ श्रीगङ्गाजि को साध पनि लाग्नै छ लडाइं मा पुकेन भन्या लोलो पोता अनेक कल छल गरि कन पनि यो नेपाल को तखत किल्ला हो यो किल्ला पायो भन्या चारै चादसाइ लाई वहुला लाउनै छ ईस्वर ले रचना गर्न्या को किल्ला रहे छ स्वधनु पर्ने रहेन छ । सिचपुरि १ फुल्चोको २ चन्दागिरि ३ महादेउ पोषरि ४ पालुं ५ दाप्चा ६ काहुल्या ७ यिन मा पनि किल्ला पक्की बनाउनु किल्ला पिछे तोप लमलट गरि रापि दिनु र ।

नयराजः पन्तः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चित्रकार

रत्नलाल, चित्रकारी लायेकू साल काठमाडौं नेपाल ।

काष्ठ कार

ज्ञानरत्न, सिन्दुराकार— (श्री लँथाः)
काष्ठ-चित्र-साँचो (कार्यालय)
टेलिफोन यतखा टोल काठ माडौं नेपाल ।

(श्री लँ थाः) को अर्थ-हामीहरूको धौता लाई बचाउने अर्थात धौताले लाउने लुगा बुझ्ने काम भयेको ले हाम्रो जात (श्री लँ थाः) हो ।

(दोश्रो सिन्दुराकार) को अर्थ अधी अधी हामीहरू को काम (सिन्दुर) बनाउने पनि मोरहेछ त्यसकारण हामीहरूलाई (सिन्दुराकार) भनेर आयेको हो ।

श्री भनेको दर्जा हो
लँ भनेको लुगा हो
थाः भनेको बुझ्ने हो

बुन्येर
तयार भयेको
कपरा को नाम न्येवारी
आधा घाट [कोहे लँ] भन्ने अद्यापि
नाउले चलेकै छ ।

अयं काष्ठफलकशिल्पी कुशलः । यः खलु काष्ठेऽपि सूक्ष्मकलां प्रदर्शयति । नेपालस्य वैशिष्ट्यमिदं काष्ठशिल्पे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स. पु. गो. द. नं ००३३

संस्कृतसन्देशसहायका ग्राहकाश्च

महानुभावाः

श्रीचौ. पूर्णचन्द्रलाहः ६ ।
श्रीमदनबाहादुरवस्न्यातः ४ ।
श्रीवखतमानसिंहवस्न्यातः ४ ।

विजयाशंसा

विजया विजयाय जायतां,
भुजजानां भुजवीर्यवर्द्धिनी ।
द्विजराजसमाजमोजसा,
प्रथयन्ती पृथिवीतलेऽखिले ॥

सूचना

सन्देशार्कः प्रचरति पुरावृत्तरूपप्रकाशो,
देशे देशे पुरि पुरि गृहे मण्डपे मण्डपे ताः ।
आलोक्यन्तां विरलविषया दिग्रतो नष्टशिष्टा,
राजामात्याः सुकृतिकृतयः संस्कृतज्ञैः कृतज्ञैः ॥

योगी नरहरिनाथः

सरस्वतीप्रेसमहाबौद्धमासंग्रल्लीनेपालस्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu